नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 23

No. of Printed Pages — 3

**VU—53–Nim. Dar.**

# वरिष्ठ उपाध्याय परीक्षा, 2014

## निम्बार्क दर्शनम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. अद्वैतं किम् ? 1

2. निम्बार्काचार्यस्य सिद्धान्तः कः ? 1

3. वैराग्यं कतिविधिम् ? 1

4. निम्बार्कमते कानि तत्त्वानि ? तेषां नामानि लिखत । 2

5. चित्पदार्थः कः ? ग्रन्थदिशा संक्षेपेण लिखत । 2

6. श्रीअरुणमहर्षेः परिचयः लेखनीयः । 2

7. परीक्षिन्महाराजः मुनीश्वराणां स्वागतं केन प्रकारेण कृतवान् ? 2

8. सर्वं हि विज्ञानमतो .................... इति श्लोकं पूरयत । 2

9. श्रीनियमानन्दस्य दीक्षागुरुः कः ? दीक्षामन्त्रानपि लिखत । 2

10. के पञ्चसूनाः ? नामानि लिखत । 2

11. मिथ्याचारः कः उच्यते ? 2

12. वर्णसांकर्यस्य दोषान् लिखत । 2

13. सदसतोः स्वरूपं निरूपयत । 2

14. भेदवादस्य समर्थनाय श्रुतिप्रामाण्यं विलिखत । 4

15. ऋजुसर्पन्यायेन भेदाभेदघटकतया भेदं लिखत । 4

16. निम्नलिखितस्य श्लोकस्य भावार्थः लेख्यः —

    जयति च मद्गुरुचरणं यत्संसर्गाद बोधोऽपि ।

    काञ्चनभूतिं लभते पारससङ्गाद्यथा लौहः ॥ 4

17. निम्नलिखितश्लोकस्य व्याख्या करणीया —

    अङ्गे तु वामे वृषभानुजां मुदा विराजमानामनुरूपसौभगाम् ।

    सखीसहस्रैः परिसेवितां सदा स्मरेम देवीं सकलेष्टकामदाम् ॥ 6

    **अथवा**

    भगवान् हंसः कस्मात् कारणात् प्रकटितोऽभवत् ?

18. श्री निम्बार्काचार्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत । 6

**अथवा**

वेदान्तदार्शनिक-स्वाभाविक-द्वैताद्वैतसिद्धान्तस्य परिचयो देयः ।

19. निम्नांकितयोः श्लोकयोः **एकस्य** सप्रसङ्गं व्याख्या विधेया — 6

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

**अथवा**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥

20. निम्नांकितयोः श्लोकयोः **एकस्य** सप्रसङ्गं भावार्थः लेखनीयः — 6

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।

इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञाप्रतिष्ठिता ॥

**अथवा**

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ।

स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

21. द्वैताद्वैतविवेकानुसारं सर्वेश्वरस्वरूपं वर्णयत । 7

**अथवा**

वेदान्तरत्नमञ्जूषानुसारं विग्रहस्य आनन्दरूपतां वर्णयत ।

22. भगवत्स्वरूपविग्रहयोः वैधर्म्यं वर्णयत । 7

23. ईश्वरजीवयोरप्राकृतेन सह वैधर्म्यं विलिखत । 7

**अथवा**

निम्बार्कमते तत्त्वत्रयस्वीकारेऽपि एकविज्ञानेन सर्वं ज्ञातं भवतीति विवेचयत ।